पान्थमुषं हृत्वं गले बद्धावलम्बयेदिति"। पान्थमुषं पथिलुण्ठकम्। ग्रन्थिभेदकस्य दण्डमाह मनुः "अङ्गुली ग्रन्थिभेदस्य छेदयेत् प्रथमे ग्रहे। द्वितीये हस्तचरणौ तृतीये बधमर्हतीति"। अङ्गुली तर्जन्यङ्गुष्ठौ। द्वितीये हस्तस्य चरणस्य च छेदः तृतीये वध इत्यर्थः। अतएव नारद आह" "प्रथमे ग्रन्थिभेदानामङ्गुष्ठहस्तयोर्बधः" इति। स्त्रीहन्तुर्द्दण्डमाह व्यासः "स्त्रीहन्ता लोहशयने दग्धव्यो वै कटाग्निनेति"। पुंहन्तुर्दण्डमाह स एव "नरहन्तुर्हस्तपादौ च्छित्त्वा स्थाप्यस्तत्पथे" इति। गोहन्तुर्दण्डमाह वृहस्पतिः "गोहन्तुर्नासिकां छित्त्वा बद्धाम्भसि निमज्जयेदिति"। नारदः "सर्वस्वं हरतो नारीं, कन्यां तु हरतो वधः। वाजिवारणलोहानां चाददीत वृहस्पतिरिति"। सर्वस्वमित्यनुषङ्गः। पशुहन्तुर्दण्डमाह व्यासः" "पशुहन्तुः स्वर्द्ध पादं तीक्ष्णशस्त्रेण कर्त्तयेदिति"। पशुहन्ता पश्वनुसारेण दण्डनीय इत्याह नारदः "महापशून् स्तेनयतो दण्डमुत्तमसाहसम्। मध्यमपशून् पूर्व्वन्तु क्षुद्रपशून् तथा हृतः इति। हृत इति षष्ठी। वन्दीग्रहादीनां दण्डमाह याज्ञवल्क्यः "वन्दिग्रहांस्तथा वाजि कुञ्जराणां च हारिणः। प्रसह्यघातिनश्चैव शूलमारोपयेन्नृपः" इति। अङ्गच्छेदादयः उत्तमसाहसत्वाद् ब्राह्मण व्यतिरिक्तोत्तमद्रव्यापहारविषयाः "साहसेषु य एवोक्तास्त्रिषु दण्डो मनीषिभिः। स एव दण्डः स्तेयेऽपि द्रव्येषु त्रिष्वनुक्रमादिति" नारदेनोत्तमसाहसस्योत्तमद्रव्यविषयत्वेन व्यवस्थापनात्तेन क्षुद्रमध्यमद्रव्याक्षेपकादीनां तदनुरूपो न करच्छेदादिः। तस्करस्यापहृतं धनन्तत्स्वामिने दापयित्वा दण्डः कर्त्तव्य इत्याह याज्ञवल्क्यः "चौरं प्रदाप्यापहृतं घातयेद्विविधैर्बधैरिति" धान्याद्यपहरणे दण्डमाह मनुः "धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं बधः। शेषे त्वेकादशगुणं दाप्यस्तस्य च तद्धनमिति"। कुम्भो विंशतिप्रस्थाः शेषे दशकुम्भाधिकान्न्यूने, तस्य धान्यस्वामिनः। रत्नहरणे दण्डमाह स एव "मुख्यानाञ्चैव रत्नानां हरणे बधमर्हतीति"। स एव। "सुवर्णरजतादीनामुत्तमानाञ्च वाससाम्। पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते। शेषे त्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत्। पुरुषाणां कुलीनानान्नारीणाञ्च विशेषतः" इति। अत्र सुवर्णादीनां संख्या कर्षमितेत्याहुः वृद्धाः इति मदनरत्ने। अत्राङ्गच्छेदादिदण्डो ब्राह्मणव्यतिरिक्तविषयः "सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेदिति" याज्ञवल्क्यस्मरणात्। चिह्नं ललाटे श्वपदाकाराङ्कनम्। तथा च मनुः "गुरुतल्पे भगः कार्य्यः सुरापाणे सुराध्वजः। स्तेये च श्वपदं कार्य्यं ब्राह्मणस्य शिरः पुमानिति"। एतच्च प्रायश्चित्तमकुर्वतां दण्डोत्तरकालं न तु प्रायश्चित्तं चिकीर्षताम्। "प्रायश्चित्तन्तु कुर्वाणाः सर्वे वर्णा यथोदितम्। नाङ्क्या राज्ञा ललाटे तु दाप्यस्तूत्तमसाहसमिति" मनुस्मरणात्। जात्यादिभेदेन च दण्डतारतम्यमाह स एव "अष्टापाद्यन्तु शूद्रस्य स्तेये भवति किल्बिषम्। षोडशैव तु वैश्यस्य द्वात्रिंशत् क्षत्रियस्य तु। ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतम्भवेत्। द्विगुणा वा चतुःषष्टिस्तद्दोषगुणवेदिनः" इति। यस्मिन्नपराधे यो दण्ड उक्तः स शूद्रकर्त्तृके तस्मिन्नष्टगुणः दापनीयः वैश्यकर्त्तृके षोडशगुणः, क्षत्रियकर्त्तृके द्वात्रिंशद्गुणः। ब्राह्मणकर्त्तृके चतुःषष्टिगुणः शतगुणो वा अष्टाविंशत्युत्तरशतगुणो वेत्यर्थः। माषान्यूनमूल्यानां क्षुद्राणां मूल्यात् पञ्चगुणो दम इत्याह नारदः "काष्ठभाण्डतृणादीनां मृण्मयानान्तथैव च। वेणुवैणवभाण्डानां तथा स्नाय्वस्थिचर्म्मणाम्। शाकानामार्द्रमूलानां हरणे फलमूलयोः। गोरसेक्षुविकाराणां तथा लवणतैलयोः। पक्वान्नानां कृतान्नानां मत्स्यानामौषधस्य च। सर्वेषामल्पमूल्यानां मूल्यात्पञ्चगुणो दमः" इति। यत्पुनः क्षुद्रद्रव्यविषये द्विगुणदण्डप्रतिपादकं मनुवचनम् "सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च। दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च। वेणुवैणवभाण्डानां लवणानान्तथैव च। मृण्मयानां च हरणे मृदोभस्मन एव च। अजानां पक्षिणाञ्चैव लवणस्य घृतस्य च। मांसस्य मधुनश्चैव यच्चान्यत् पशुसम्भवम्। अन्येषाञ्चैवमादीनां मद्यानामोदनस्य च। पक्वान्नानाञ्च सर्वेषां तन्मूल्याद्द्विगुणो दमः" इति। तदल्पप्रयोजनविषयम्। पान्थादीनामल्पप्रयोजनद्रव्यापहरणे न दण्डः यथाह स एव "द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके। आददानः परक्षेत्रान्न दण्डं दातुमर्हति। चणकव्रीहिगोधूमयवानां मुद्गमाषयोः। अनिषिद्धैर्ग्रहीतव्या मुष्टिरेका पथि स्थितैः। तथैव सप्तमे भक्ते भक्तानि षडनश्नता। अश्वस्तनविधानेन हर्त्तव्यं हीनकर्म्मणः" इति। न केवलं चौरस्यैव दण्डः किन्त्वचौरस्यापि